# બ્રહ્મકૃતં છિન્નમસ્તાસ્તોત્રમ્ ૨

ChinnamastAstotram 2

sanskritdocuments.org

June 20, 2018

# ChinnamastAstotram 2

# બ્રહ્મકૃતં છિન્નમસ્તાસ્તોત્રમ્ ૨

## Sanskrit Document Information

Text title : ChinnamastA Stotram 2 by brahma

File name : ChinnamastAstotrambrahma.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Author : brahma

Proofread by : Lalitha Parameswari parameswari.lalitha at gmail.com, NA

Description-comments : In shAktapramoda and mantramahArNava

Latest update : June 21, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 20, 2018

*sanskritdocuments.org*

# બ્રહ્મકૃતં છિન્નમસ્તાસ્તોત્રમ્ ૨

શ્રીગણેશાય નમઃ ।
અથ સ્તોત્રમ્ ।
ઈશ્વર ઉવાચ -
સ્તવરાજમહં વન્દે વૈરોચન્યાઃ શુભપ્રદમ્ ।
નાભૌ શુભ્રારવિન્દં તદુપરિ વિલસન્મણ્ડલં ચણ્ડરશ્મેઃ
સંસારસ્યૈકસારાં ત્રિભુવનજનનીં ધર્મકામાર્થદાત્રીમ્ ।
તસ્મિન્મધ્યે ત્રિમાર્ગે ત્રિતયતનુધરાં છિન્નમસ્તાં પ્રશસ્તાં
તાં વન્દે છિન્નમસ્તાં શમનભયહરાં યોગિનીં યોગમુદ્રામ્ ॥ ૧॥

નાભૌ શુદ્ધસરોજવક્ત્રવિલસદ્બન્ધૂકપુષ્પારુણં
ભાસ્વદ્ભાસ્કરમણ્ડલં તદુદરે તદ્યોનિચક્રં મહત્ ।
તન્મધ્યે વિપરીતમૈથુનરતપ્રદ્યુમ્નસત્કામિન્-
પૃષ્ઠસ્થામ્ તરુણાર્કકોટિવિલસત્તેજસ્સ્વરૂપાં ભજે ॥ ૨॥

વામે છિન્નશિરોધરાં તદિતરે પાણૌ મહત્કર્તૃકાં
પ્રત્યાલીઢપદાં દિગન્તવસનામુન્મુક્તકેશવ્રજામ્ ।
છિન્નાત્મીયશિરસ્સમુચ્છલદસૃગ્ધારાં પિબન્તીં પરાં
બાલાદિત્યસમપ્રકાશવિલસન્નેત્રત્રયોદ્ભાસિનીમ્ ॥ ૩॥

વામાદન્યત્ર નાલં બહુગહનગલદ્રક્તધારાભિરુચ્ચૈઃ
ગાયન્તીમસ્થિભૂષાં કરકમલલસત્કર્તૃકામુગ્રરૂપામ્ ।
રક્તામારક્તકેશીમપગતવસનાં વર્ણિનીમાત્મશક્તિં
પ્રત્યાલીઢોરુપાદામરુણિતનયનાં યોગિનીં યોગનિદ્રામ્ ॥ ૪॥

દિગ્વસ્ત્રાં મુક્તકેશીં પ્રલયઘનઘટાઘોરરૂપાં પ્રચણ્ડાં
દંષ્ટ્રા દુષ્પ્રેક્ષ્ય  વક્ત્રોદરવિવરલસલ્લોલજિહ્વાગ્રભાસામ્ ।
વિદ્યુલ્લોલાક્ષિયુગ્માં હૃદયતટલસદ્ભોગિનીં ભીમમૂર્ત્તિં
સદ્યશ્છિન્નાત્મકણ્ઠપ્રગલિતરુધિરૈર્ડાકિનીં વર્ધયન્તીમ્ ॥ ૫॥

બ્રહ્મેશાનાચ્યુતાદ્યૈઃ શિરસિ વિનિહતા મન્દપાદારવિન્દૈ-
રાપ્તૈર્યોગીન્દ્રમુખ્યૈઃ પ્રતિપદમનિશં ચિન્તિતાં ચિન્ત્યરૂપામ્ ।
સંસારે સારભૂતાં ત્રિભુવનજનનીં છિન્નમસ્તાં પ્રશસ્તા-
મિષ્ટાં તામિષ્ટદાત્રીં કલિકલુષહરાં ચેતસા ચિન્તયામિ ॥ ૬॥

ઉત્પત્તિસ્થિતિસંહતીર્ઘટયિતું ધત્તે ત્રિરૂપાં તનુમ્ ।
ત્રૈગુણ્યાજ્જગતો યદીય વિકૃતિર્બ્રહ્માચ્યુતઃ શૂલભૃત્ ॥

તામાદ્યાં પ્રકૃતિં સ્મરામિ મનસા સર્વાર્થસંસિદ્ધયે ।
યસ્યાઃ સ્મેરપદારવિન્દયુગલે લાભં ભજન્તે નરાઃ ॥ ૭॥

અભિલષિતપરસ્ત્રીયોગપૂજાપરોઽહં
બહુવિધજનભાવારમ્ભસમ્ભાવિતોઽહમ્ ।
પશુજનવિરતોઽહં ભૈરવીસંસ્થિતોઽહં
ગુરુચરણપરોઽહં ભૈરવોઽહં શિવોઽહમ્ ॥ ૮॥

ઇદં સ્તોત્રં મહાપુણ્યં બ્રહ્મણા ભાષિતં પુરા ।
સર્વસિદ્ધિપ્રદં સાક્ષાન્મહાપાતકનાશનમ્ ॥ ૯॥

યઃ પઠેત્પ્રાતરુત્થાય દેવ્યાઃ સન્નિહિતોઽપિ વા ।
તસ્ય સિદ્ધિર્ભવેદ્દેવિ વાઞ્છિતાર્થપ્રદાયિની ॥ ૧૦॥

ધનં ધાન્યં સુતં જાયાં હયં હસ્તિનમેવ ચ ।
વસુન્ધરાં મહાવિદ્યામષ્ટસિદ્ધિં લભેદ્ ધ્રુવમ્ ॥ ૧૧॥

વૈયાઘ્રાજિનરઞ્જિતસ્વજઘનેઽરણ્યે પ્રલમ્બોદરે
ખર્વેઽનિર્વચનીયપર્વસુભગે મુણ્ડાવલીમણ્ડિતે ।
કર્ત્રીં કુન્દરુચિં વિચિત્રવનિતાં જ્ઞાને દધાને પદે
માતર્ભક્તજનાનુકમ્પિનિ મહામાયેઽસ્તુ તુભ્યં નમઃ ॥ ૧૨

ઇતિ બ્રહ્મકૃતં છિન્નમસ્તાસ્તોત્રમ્ ॥

Proofread by lalitha parameswari parameswari.lalitha gmail.com

*ChinnamastAstotram 2*

pdf was typeset on June 20, 2018

Please send corrections to *sanskrit@cheerful.com*